पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः परः ॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ ।
एषामभावे दातॄणां कन्या कुर्य्यात् स्वयंवरम् ॥
सकृत् प्रदीयते कन्या हरंस्तां चौरदण्डभाक् ।
अदुष्टां हि त्यजन् दण्ड्यः सुदुष्टां हि परि-
त्यजेत् ।”
इति गारुडे ९५ अध्यायः ॥ * ॥
अपरञ्च ।
यम उवाच ।
“कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वल-
ङ्कृताम् ।
ब्रह्मदेयां द्विजश्रेष्ठ ब्रह्मलोकं व्रजन्ति ते ॥
कन्यादानन्तु सर्व्वेषां दानानामुत्तमं स्मृतम् ॥
महान्त्यपि समृद्धानि गोऽजाविकधनान्यतः ।
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्ज्जयेत् ॥
हीनक्रियेषु पापेषु सुतं उद्वेगकारिणाम् ।
क्षयामयमहाव्याध्यश्वित्रिकुष्ठिकुलानि च ॥
यस्यास्तु न भवेद्भ्राता न च विज्ञायते पिता ।
नोपयच्छेत तां प्राज्ञः पुत्त्रिकाधर्म्मशङ्कया ॥
चतुर्णामपि वर्णानां प्रेत्य चेह हिताय च ।
अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत ॥
ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
प्रसाद्य चार्च्चयित्वा च श्रुतशीलवते स्वयम् ।
दद्यात् कन्यां यथान्यायं ब्राह्मो धर्म्मः प्रकी-
र्त्तितः ॥ १ ॥
यज्ञे तु वितते सम्यगृत्विजे कर्म्म कुर्व्वते ।
अलङ्कृत्य तथा दानं दैवो धर्म्मः प्रशस्यते ॥२॥
एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः ।
कन्यादानन्तु विधिवदार्षो धर्म्मः स उच्यते ॥३॥
सहोभौ चरतां धर्म्ममिति चैवानुभाष्य तु ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥४॥
ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते ॥५॥
इच्छयान्योन्यसंयोगात् कन्यायाश्च वरस्य च ।
गान्धर्व्वः स तु विज्ञेयो मिथुन्यः कामसम्भवः ॥६॥
हत्वा छित्वा च भित्वा च प्रसह्य रुदतीं गृहात् ।
हरणं क्रियते यत्र राक्षसो विधिरुच्यते ॥ ७ ॥
सुप्तां मत्तां रहः कन्यां छद्मना नीयते तु या ।
स पापिष्ठो विवाहानां पैशाचः प्रथितो-
ऽष्टमः ॥ ८ ॥
पञ्चानान्तु त्रयो धर्म्मा द्वावधर्म्मौ द्विजोत्तम ।
पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन ॥
चतुर्णामपि वर्णानामेष धर्म्मः सनातनः ।
पृथग्वा यदि वा मिश्रा कर्त्तव्या नात्र संशयः ॥
कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
विवाहकाले संप्राप्ते यथोक्ते सदृशे वरे ।
क्रमात् क्रमं क्रतुशतमनुपूर्व्वं लभन्ति ते ॥
श्रुत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः ।
विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥
ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति ।
ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्माद्यैः पूजितः सुरैः ॥
दैवेन तु विवाहेन यस्तु कन्यां प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति ॥
गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति ।
गन्धर्व्वलोकमासाद्य क्रीड़ते देववच्चिरम् ॥
शुल्केन दत्त्वा यो कन्यां तां पश्चात् सम्यगर्च्चयेत् ।
स किन्नरैश्च गन्धर्व्वैः क्रीड़ते कालमक्षयम् ॥
न मन्युं कारयेत् तासां पूज्याश्च सततं गृहे ।
ब्रह्मदेया विशेषेण ब्राह्मभोज्या सदा भवेत् ॥
कन्यायां ब्रह्मदेयायामभुञ्जन् सुखमश्नुते ।
अथ भुञ्जति यो मोहात् भुक्त्वा स नरकं व्रजेत् ॥*
अप्रत्तायाश्च कन्यायां न भुञ्जीयात् कदाचन ।
दौहित्रस्य सुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महाघसमाकीर्णांस्त्राति ते नरकाद्भयम् ।
तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥”
इत्यादि वह्निपुराणे तड़ागादिप्रशंसानामा-
ध्यायः ॥ * ॥ विवाहकाले मिथ्यावचने दोषा-
भावो यथा,—
शर्म्मिष्ठोवाच ।
“न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन् न विवाहकाले ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥”
इति मात्स्ये ३१ अध्यायः ॥ * ॥
विवाहे वर्णनीयानि यथा,—
“विवाहे स्नानशुभ्राङ्गभूषोलूलुध्वनीरवाः ।
देवी संगीततारेज्या लाजमङ्गलवर्त्तनम् ॥”
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥*॥
अथ विवाहोक्तदिनानि । तत्रान्दादिशुद्धि-
र्यथा,—
“प्रसूत्याधानतः शुद्धिर्विषमेऽब्दे समे क्रमात् ।
विवाहे योषितां चन्द्रार्केज्यशुद्धिर्योषितोः ॥
सभर्त्तृकक्रियारम्भे भर्त्तुर्गोचरशुद्धितः ।
यात्रोद्वाहे गर्भलग्ने स्वशुद्ध्याप्नोति तत् फलम् ॥
आरभ्य जन्मसमयात् युवतेर्विवाह-
मोजाब्दकेषु मुनयः शुभमादिशन्ति ।
आधानतः प्रभृतितः समवत्सरेषु
प्रोक्तस्तयोर्न शुभदस्तु विलोमवर्षे ॥ * ॥
अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेत् ।
तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता ॥
मासत्रयादूर्द्ध्वमयुग्मवर्षे
युग्मे च मासत्रयमेव यावत् ।
विवाहशुद्धिं प्रवदन्ति सर्व्वे
वात्स्यादयो ज्योतिषि जन्ममासात् ॥
युग्माब्दकेषु युवतेरपि जन्ममासात्
मासत्रयं विवहने परमब्दशुद्धिम् ।
प्राहुः समस्तमुनयो विषमे तु वर्षे
मासत्रयादुपरितः खलु जन्ममासात् ॥”*॥
राजमार्त्तण्डे ।
“माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्ज्जिताः ॥”
कन्यासंवरणे हस्तोदकविधौ ।
“दम्पत्योर्द्विनवाष्टराशिरहिते तारानुकूले रवौ
चन्द्रे चार्ककुजार्किशुक्रवियुते मध्येऽथवा
पापयोः ।
त्यक्त्वा च व्यतिपातवैधृतिदिनं विष्टिञ्च रिक्तां
तिथिं
क्रूराहायनचैत्रपौषरहिते लग्नांशके मानुषे ॥”*
योगविशेषे दोषविशेषानाह रत्नमालायाम् ।
“कुलोच्छेदो व्यतीपाते परिघे स्वामिघातिनी ।
वैधृतौ विधवा नारी विषदाहोऽतिगण्डके ।
व्याघाते व्याधिसंघातः शोकार्त्ता हर्षणे तथा ।
मूले च व्रजमूलं स्यात् गण्डे रोगभयं तथा ।
विष्कम्भेऽप्यहिदंशः स्यात् वज्रके मरणं भवेत् ।
एते वै दारुणाः सर्व्वे दश योगाः प्रकीर्त्तिताः ॥”
आश्वलायनः । उदगयने आपूर्य्यमाणे पक्षे
कल्याणे नक्षत्रे चौड़कर्म्मोपनयनगोदान-
विवाहाः । विवाहः सार्व्वकालिक इत्येक इति ।
“आषाढ़े धनधान्यभोगरहिता नष्टप्रजा श्रावणे
वेश्या भाद्रपदे इषे च मरणं रोगान्विता
कार्त्तिके ।
पौषे प्रेतवती वियोगबहुला चैत्रे मदोन्मादिनी
अन्येष्वेव विवाहिता पतिरता नारी समृद्धा
भवेत् ।
हरौ च सुप्ते न च दक्षिणायने
तिथौ च रिक्ते शशिनि क्षयं गते ।
राजग्रस्ते तथा युद्धे पितॄणां प्राणसंशये ।
अतिप्रौढ़ा च या कन्या नानुकूलं प्रतीक्षते ॥
अतिप्रौढ़ा च या कन्या कुले धर्म्मविरोधिनी ।
अविशुद्धापि सा देया चन्द्रलग्नबलेन तु ॥
अयनस्योत्तरस्यादौ मकरं याति भास्करः ।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम् ॥”
इति विष्णुपुराणोक्तस्य चूड़ादावयनस्य परिग्रहः
दिनमानादिबोधे तु सिद्धान्तादयनपरिग्रहः ॥*॥
सार्व्वकालिक इत्यस्य विषयमाह भुजबलभीमे ।
“ग्रहशुद्धिमब्दशुद्धिं शुद्धिं मासायनर्त्तुदिव-
सानाम् ।
अर्व्वाक् दशवर्षेभ्यो मुनयः कथयन्ति कन्य-
कानाम् ॥
एतत्परन्तु विशेषमङ्गिरोवचनं यथा ।
कालात्यये च कन्यायाः कालदोषो न विद्यते ॥
मलमासादिकालानां विवाहादौ प्रयत्नतः ।
पुंसः प्रति सदा दोषात् सर्व्वदैव हि वर्ज्जता ॥”
ज्योतिश्चिन्तामणौ ।
“वापीकूपतड़ागयागगमनक्षौरप्रतिष्ठाव्रतं
विद्यामन्दिरकर्णवेधनमहादानं वनं सेवनम् ।
तीर्थस्नानविवाहदेवभवनं मन्त्रादिदेवेक्षणं
दूरेणैव जिजीविषुः परिहरेदस्तं गते भार्गवे ॥”
बृहद्राजमार्त्तण्डे ।
“सर्व्वाणि शुभकर्म्माणि कुर्य्यादस्तं गते शिशौ ।
विवाहं मेखलाबन्धं यात्राञ्च परिवर्ज्जयेत् ॥”
यात्राञ्चेति चकारो वचनान्तरोक्तप्रातिस्विक-
निषिद्धकर्म्मान्तरं समुच्चिनोति ।
“बाले शुक्रे वृद्धे शुक्रे नष्टे शुक्रे जीवे नष्टे ।